# गुरु परंपरा स्तोत्रं

नारायणः पद्मभवो वशिष्ठः शक्तिश्च तत्पुत्रपराशरश्च ।
व्यासः शुको गौढपदो यमींद्रो गोविंदयोगीति गुरुक्रमोयम् ॥

आद्यः श्री शंकराचार्यो भगवत्पाद संज्ञकः ।
अवतीर्णः शंभूरिति प्रथितः श्रीआर्यांबाल् शिवगुरो पुत्रः कालडीपदे ॥

सुरेश्वरः पद्मपादो हस्तामलक तोटकौ ।
सर्वज्ञश्चेति तच्चिष्याः प्रथिता गुरुसन्निभाः ॥

शंकरः कामकोट्याख्यं पीठं कांच्यां व्यराजयत् ।
प्रत्यस्थापयत् अद्वैतं पीठे सर्वज्ञकेस्थितः ॥

आत्मानामनु सर्वज्ञं सुरेश्वरमते स्थितम्
गोप्तारम् कामकोट्याख्या पीठस्य व्यदधात् गुरुः
तदाद्येंद्र सरस्वत्याख्या अविच्चिन्ना परंपरा
पातिनो गुरुवर्याणां शारदामठ सुस्थिता
अष्टषष्टितमाचार्यः श्री महालक्ष्मि गर्भधृतः सुब्रह्मण्यात्मजः
जयाब्दवैशाखजातः प्रतिपत्तिति संभवः अनुराधाभवः अजः अप्रमेयः
शिष्य श्री जयेंद्रो प्रशिष्य श्री विजयेंद्रेद्यो गुरोप्रेरकेच्छशक्तिः

© 2022 Vedam Nadam

परमपूज्यः श्री चरणः शंकर जगद्गुरो परमाचार्य महास्वामि
महापॆरियवा विराजते ब्रह्म भूतः पुरः स्फुरितभातनुः सर्व व्यापिस्थितः
ध्यायामि तमः निसम्

सदाशिवसमारंभां शंकराचार्य मध्यमाम् ।
अस्मदाचार्य पर्यंतां वंदे गुरु परंपराम् ॥

गुरवे सर्व लोकानां भिषजे भवरोगिणाम् ।
निधये सर्व विद्यानां दक्षिणामूर्तये नमः ॥

गुरुब्रह्म गुरुर्विष्णुः गुरुद्देवो महेश्वरः ।
गुरुः साक्षात्परं ब्रह्म तस्मै श्री गुरवे नमः ॥

श्रुतिस्मृतिपुराणानां आलयं करुणालयम् ।
नमामि भगवत्पादं शंकरं लोकशंकरम् ॥

दयमानदीर्घनयन देशिकता अभीति भव्यदक्षकरा ।
वामकरणिहित दंडाभाति पुरः सा गुरोर्मूर्तिः ॥

अपारकरुणा सिंदुं ज्ञानदं शांतरूपिणम् ।
श्रीचंद्रशेखर गुरुं प्रणमामि मुदान्वहम् ॥

© 2022 Vedam Nadam

परित्यज्य मौनं वतधः स्थितिं च व्रजन्भारतस्य प्रदेशात् प्रदेशम् ।
मधुश्यंदिवाच जनान् धर्ममार्गे नयन् श्री जयेंद्रो गुरुर्भाति चित्ते ॥

नमामः शंकरन्वाक्य विजयेंद्र सरस्वतीम् ।
श्री गुरुं शिष्टमार्गानुनेतारं सन्मतिप्रदम् ॥

© 2022 Vedam Nadam